श्री सरस्वती नक्षत्रमाला स्तवः

श्री सरस्वती नक्षत्रमाला स्तवः

अयि देवि सरस्वति त्वदीयाः
स्तुतिधाराः परिलेढुमुद्यतां नः |
स्वयमेव तव स्तवं दुहानां
रसनां मातरिमां सनाथयेथाः || 1 ||

अरुणाधरबिंबमंबुजाक्षं
करुणावर्षि कटाक्षकेलिलक्षं |
वदनं तव हंत भारति त्व-
-त्पथमुल्लंघ्य विशृंखलं चकास्ति || 2 ||

अकलंकशरच्छशांकलक्षा-
-प्यसदृक्षा तव वाणि वक्त्रभंग्याः |
अधरः पुनरंब पक्वबिंबी-
-पटलीपाटलिमापवादवीरः || 3 ||

नवपल्लवदर्पविभ्रमान् वा
शरदंभोजवनच्छविच्छटां वा |
परिजेतुमलं भवत्पदश्री-
-रिति वादोऽप्यसदृक्षदिक्षु गण्यः || 4 ||

तव देवि न केवलं मुखेंदु-
-र्विकळंकेषु विशेषलेखनीयः |
अपि तु स्फुटमंघ्रिपंकजाग्रे
विहरंतः सुकृतो नखेंदवोऽपि || 5 ||

अणिमा तव हंत मध्यभागे
महिमानं निरुणद्धि निर्विवादं |
परिपाटलिमा च पाणिपादा-
-धरबिंबे तनुकांतिपांडिमानं || 6 ||

अपि मौळिपदे पदं भवत्याः
शशिना हंत जडेन शांतमेनः |
अत एव भवत्पदाब्जसेवा-
-विरही नित्यनिरूढमौग्ध्यकार्श्यः || 7 ||

अविशंकितदोषगंधवार्तां
विशदाशेषगुणां विचित्रभूषां |
रसपोषविशेषितां विधाता
नयनैस्त्वां श्रवणैर्वयं भजामः || 8 ||

जननीं रजनीकरावतंसां
जगतां जंगमपारिजातवल्लीं |
करुणापरिणाहिनेत्रयात्रां
कतिचित् त्वां हृदये वहंति धन्याः || 9 ||

परिमंडलकांतिभारनम्रां
त्रिजगन्मंगळदीर्घदीपलेशां | (दीपलेखां)
सुकृतां रसनांचले ज्वलंतीं
भवतीं चेतसि भावयंति धन्याः || 10 ||

भवतीमवतीर्य चित्तवीथ्यां
विहरंतीं विविधैर्विभूतिभारैः |
भुवनाद्भुतविभ्रमाभिरामां
पुलकैः कैरपि पूजयंति धन्याः || 11 ||

पतता हृदि हर्षबाष्पमूर्त्या
पयसा त्वामभिषिच्य कोऽपि हृद्यां |
पुळकांकुरभूषितां विधत्ते
स्फुटमात्मीयतनूमिवार्द्रचेताः || 12 ||

मधुरस्मितधौतविश्वविद्या-
-विभवोद्गारिमुखेंदुसंपदं त्वां |
परिभावयतां परं मुनीनां
निखिलाचार्यपदानि निर्वहंते || 13 ||

कमलेति भुजांतरे मुरारे-
-र्गिरिकन्येति शिवस्य वामपार्श्वे |
परिराजसि भारतीति धातु-
-र्वदनांभोजचतुष्पथे त्वमेका || 14 ||

चतुरेषु चतुर्षु वक्त्रचंद्रे-
-ष्वधिवासं भवती विधेर्विधत्तां |
वदने पुनरंब मादृशानां
किमिदं नृत्यसि नन्वियं कृपा ते || 15 ||

भवतीं भवतीव्रवेदनार्ताः
परमानंदपयोधिवीचिमालां |
वचसामधिदेवते वयं ते
मनसा मंक्षु विगाह्य धन्यधन्याः || 16 ||

जगतामधिपत्नि निःसपत्नं
त्वयि चित्तं मम मग्नमस्तु मातः |
पदयोर्द्वयमद्वयं पदं वा
तव जानन्नपि नाम धन्यधन्याः || 17 ||

निखिलागमनिर्विवादगीतं
सहजानंदतरंगदंतुरं ते |
मनसः कुहरे वयं पदं ते
गगनोल्लंघि कथं कथं वहामः || 18 ||

स्वरसप्रतिभासुरं पदं यत्
सुखसाम्राज्यमनर्गळप्रसारं |
अखिलाद्भुतमुज्झितोपमानं
तदहो नन्वसि धीरधीविलेह्यं || 19 ||

अतिलंघितकालभेदवादं
गलिताशेषदिशाविभागगंधं |
निरवग्रहनिश्चयप्रकाश-
-स्फुटमाधुर्यमसि त्वमंब तत्त्वं || 20 ||

सकलव्यवहारदूरदूरं
सरसं किंचिदकिंचनोपभोग्यं |
हृदयं मदयन्मदीयमुच्चै-
-र्हृषितं हृद्यमिदं पदं ननु त्वं || 21 ||

निजयैव कयापि हंत कांत्या
दलितध्वांतपरंपरोपरागं |
मधुरिम्णि परं महिम्नि चोच्चै-
-र्विशदं धाम विशृंखलं खलु त्वं || 22 ||

अपवर्गपदास्पदं पदं य-
-द्यपवर्गः पशुपाशबंधनानां |
अपतत् तव रूपमद्वितीय-
-क्षममालक्षयतां सतां किल त्वं || 23 ||

सहजा तव कापि रूपसंप-
-द्वचसां वर्त्मनि नैव नैव नैव |
अपरा पुनरात्तचित्रवेषा
भुवनं पुष्यति भूमिकाविभूतिः || 24 ||

अथवा कथयेम तं भवत्या
महिमानं महतोऽपि भो महत्याः |
अपि वाङ्मनसाध्वनि ध्वनंतीं
कथयेत् कः खलु चिंतयेच्च तां त्वां || 25 ||

न तदस्ति विनापि यत् त्वया स्या-
-च्चिदचिद्भ्यां प्रविभागभांजि विश्वे |
तदहो महिमाद्भुतं तवेदं
परमस्मात् पुनरंब यासि सासीः || 26 ||

तदलं पदलंघिनि त्वदीये
मुखरीभूय मुहुर्विभूतिपूरे |
अपि वा विनयोक्तिभिः कृतं ते
शिशुसंलापवशो हि मातृवर्गः || 27 ||

जय देवि गुणत्रयैकवेषे
जय हे देवि गुणत्रयैकभूषे |
जय देवि तमःप्रवेशदूरे
जय हे देवि निजप्रकाशधारे || 28 ||

इति ते स्तुतिमौक्तिकाद्भुतश्रीः
स्वयमग्रंथत हंत सन्निधानात् |
तदियं तव देवि कंठभूषा-
-पदवीं प्राप्य कृतार्थतां प्रयातु || 29 ||

श्रीकृष्णलीलाशुकवाक्सुभिक्षं
नक्षत्रमालेयमभूतपूर्वा |
कृष्णस्य देवस्य गिरश्च देव्याः
कलांचले वर्षतु हर्षधाराः || 30 ||

इति कृष्णकेलिशुकवाङ्मयीमिमां
मतिमान् जनः परिचिनोतु जिह्वया |
उरुचेतसा श्रवणमंडलेन वा
त्रितयेन वा त्रिभुवनाद्भुतां सुधां || 31 ||

इति श्रीलीलाशुकमुनि विरचिता श्री सरस्वती नक्षत्रमाला स्तवः ||